# Shri AnantArya Ashtakam

# श्रीमदनन्तार्याष्टकम्

## Document Information

Text title : Anantarya Ashtakam

File name : anantAryAShTakam.itx

Category : deities_misc, gurudev, aShTaka

Location : doc_deities_misc

Author : nArAyaNArya

Transliterated by : TCA Venkatesan vtca at yahoo.com

Proofread by : TCA Venkatesan vtca at yahoo.com

Acknowledge-Permission: <a href="http://www.acharya.org">Srivaishnava Sampradhayam</a>

Latest update : December 4, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# श्रीमदनन्तार्याष्टकम्

श्रीमदनन्तार्यकुमार रामानुजार्यपुत्र नारायणार्य प्रणीता
॥ श्रीमदनन्तार्य विषया अष्टश्लोकी ॥

वन्देऽनन्तगुरूत्तंस वंशमुक्ताफलात्मनः ।
रामानुजार्यस्य सुतं श्रीनारायणदेशिकम् ॥

श्रीरामानुजवरजे मुनौ शठरिपोर्गाथा विशेषार्थदे
शिष्यान् प्रेक्ष्य भवत्सु वेङ्कटपतेःकःकिङ्करस्स्या दिति ।
प्रश्नं कुर्वति तेषु मौनिषुच यो बद्धाञ्जलिः प्रार्थयन्
प्राप श्रीनिधिकिङ्करत्वमनघं तं शेष सूरिं भजे ॥ १॥

श्रीरङ्गाद्वृषभाचलं प्रचलितेश्वार्येषु भोज्यार्थिषु
श्रान्तेष्वध्वनि वेङ्कटाचलपतिः चित्रान्न पात्रं वहन् ।
पृष्टस्तैरिति को भवान् कुत इदं यःशिष्यभावं वदन्
पद्येयद्विषये बभाण फणिराट् सूर्युत्तमं तं भजे ॥ २॥

स्नातुं स्वामि सरोवरं प्रति चलन् शेषार्यवर्यःपथि
व्याघ्रे चेल दशाञ्चल स्पृशि ततः शिष्येषुमुक्त्यर्थिषु ।
भूयादेवमितिब्रुवन् पुनरपि स्नात्वैत्य पश्यन् मृतं
दीप्तं वेङ्कटनायकाङ्घ्रिकमले हृष्टोऽस्तुनः श्रेयसे ॥ ३॥

तिष्ठन् शेषगुरो ममिवहिगुरौ मुक्तिं परौदुर्लभां
व्याघ्रादेश्च ददाति चेदपि भवान् किंमेऽत्र यास्याम्यहम् ।
इत्युक्तश्च वृषाद्रि राजपतिनाऽनन्तार्य चूडामणिः
मत्तः श्रैष्ठ्यमिदं तवात्र न परं सप्ताह इत्यब्रवीत् ॥ ४॥

यास्यन् केरलसंज्ञकं जनपदं पाथेय बन्धं पथि
स्नात्वाऽऽराध्य जगद्गुरुं तदनु यो भोक्तुं विविच्यादरात् ।
धृष्ट्वा तत्रपिपीलिका इति मया नान्यत्र नेया इमाः

शेषाद्रिं पुनरेत्य ताश्चमुमुशे नन्तास्म्यनन्तं गुरुम् ॥ ५॥

श्रीमच्चम्पक जाति कुन्दकुटजा ध्युत्फुल्ल पुष्पाकरे
यस्योद्यानवरे परस्स भगवान् श्रीवेङ्कटेशो निशि ।
त्यक्त्वानन्दविमानमन्वहमहो लक्ष्म्यासहारंस्त हा
तस्मै शेषगुरूत्तमाय सततं कुर्यां नमस्सन्ततिम् ॥ ६॥

श्रीमद्वेङ्कटनायक प्रियतमा वात्सल्य सीमा रमा
निश्युद्यान लतान्त केलिसमये ग्रस्ताति भीतेव सा ।
सप्रेमस्मितमाह मुग्धमधुरं भोस्तात तातेति यं
तं वन्दे गुरुमौलि शेखरमहं शेषार्यवर्यं सदा ॥ ७॥

कन्याकक्षकरात्त पुष्पपिटकं काल्यागतं श्रीनिधिः
मह्यं देहि तवात्मजामिति भृशं यं प्रार्थ्यलेभे नतः ।
कन्याशुल्कमितीव सस्पृहतरं प्रोद्धृत्य कण्टान्निजात्
मालां यस्य गलेऽर्पयन् तमनिशं शेषार्यवर्यं श्रये ॥ ८॥

श्रीमद्रामानुजाचार्य पुत्र नारायणोदितम् ।
कलयन्तु सदा सन्तोऽनन्तार्याष्टकमादरात् ॥

॥ श्रीमदनन्तार्य अष्टश्लोकी सम्पूर्णम् ॥

Enoded and proofread by TCA Venkatesan vtca at yahoo.com
acharya.org

*Shri AnantArya Ashtakam*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*